Part-1

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda

# प्रथमो विभागः

Chapter - 1

SMT. H... MEHTA LIBRARY The M. S. University of Baroda

# प्रथमं प्रकरणम्

## १.१.० ज्योतिषशास्त्रस्य व्याख्या, प्रयोजनं, व्याप्तिश्च

### १.१.१ व्याख्या --

किं नाम ज्योतिषम् - इति प्रश्नः समुद्भवति, तदा तत्र ज्योतिषं शास्त्रं "ज्योतिषशास्त्रम्" इत्यर्थो ज्ञायते। तत्र ज्योतिषमेवं ज्यौतिषम्- एतस्य शब्दद्वयस्य प्रयोगो दरीदृश्यते। ज्योतिः -अधिकृत्य कृतं शास्त्रं ज्योतिषशास्त्रम्-एतदर्थे "अण्" प्रत्यये कृते ज्यौतिषशब्दो जायते। तथा ज्योतिरस्त्यस्मिन्पदार्थे - अर्श आदिभ्यः अच् (पा.५/२/१२७)- इति सूत्रेण ज्योतिषम्-इति शब्दो ज्ञायते।[1]

ज्योतिष-ज्यौतिषशब्दयोर्द्वयोः प्रयोगो लभ्यते। तत्र ज्योतिर्नक्षत्रादयस्तानधिकृत्य कृतं शास्त्रं ज्योतिषम्। ज्योतिःशब्दात् शेषे (पा.४/२/९२) इति सूत्रेण अणि "यस्येति चेति" अकारलोप आदिवृद्धौ विभक्तिकार्ये ज्यौतिषम्। अर्श आदिभ्यः अच् (पा.५/२/१२७) इति अच्यनुबन्धलोपे यस्येति लोपे विभक्तिकार्ये ज्योतिषम्। इत्थमुभयविधव्युत्पत्त्या नक्षत्रादीनां ज्ञानकरं शास्त्रं ज्योतिषशास्त्रमित्युपपन्नम्।[2]

"ज्योतिष"शब्दो द्युत् दीप्तौ धातोः, इसिन् प्रत्यययोगेन "द्युतेरिसिन्नादेश्च जः(४४७०)" इत्युणादिसूत्रेण दकारस्य जकारादेशे गुणे च कृते निष्पन्नो भवति। अतः प्रकाशमाना देदीप्यमानाः समस्तपिण्डा येषां प्रभावाः पृथ्वीनिवासिन उपरि स्युस्तथा यस्माद् ग्रहाणां नक्षत्राणां च गतिविवेचनसहितं कालनिर्धारणं स्यात्, तच्छास्त्रं ज्योतिषशास्त्रं कथ्यते।[3]

---

१ नारदसंहिता, विहंगमदृष्टिः पृ. ९

२ गणकतरङ्गिणी उपोद्घातः पृ. १

३ वशिष्ठसंहिता प्राक्कथनम् पृ. १९

ज्योतिर्नाम सूर्यचन्द्रामसादिका ज्योतिः। किन्तु तत्र ग्रहाणामपि संग्रहणं भवति। तेन सर्वे ग्रहाः ज्योतिःशब्देन गृह्यन्ते, तेषां शास्त्रं ज्योतिषशास्त्रम्। सूर्यादिनवग्रहाणां, अश्विन्यादीनां सप्तविंशतिनक्षत्राणां बोधकं शास्त्रं ज्योतिषं कथ्यते। सूर्यादिग्रहाः, अश्विन्यादीनि नक्षत्राणि, धूमकेत्वादीनां येन बोधो जायते, तत्कालबोधकं शास्त्रं ज्योतिषशास्त्रमिति कथ्यते। तमसो मा ज्योतिर्गमय इति आर्षवाक्येनाज्ञानतो ज्ञानं प्रति गमनं, ज्योतिः प्रति गमनमित्यर्थो ज्ञायते। यच्च शास्त्राणामाधारेण भवति तज्ज्योतिषशास्त्रम्।

### १.१.२ कालस्वरूपेण महत्त्वम् --

कालविषये सूर्यसिद्धान्ते उक्तम् -

> लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मकः।
> स द्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त उच्यते।।[४]

कालो द्विविधो वर्तते। तत्रैकः (१) कालः सृजति भूतानि, कालः संहरति प्रजाः। (२) अन्यो द्वितीयकालः खण्डकालः कलनात्मको ज्ञानविषयस्वरूपो ज्ञातुं शक्य इत्यर्थः। सः द्वितीयः कलनात्मकः कालोऽपि भेदद्वयात्मकः स्थूलसूक्ष्मत्वात्। प्रथमं स्थूलकारणेन मूर्तसंज्ञक (व्यवहारिक) उच्यते। द्वितीयः सूक्ष्मत्वेनामूर्तसंज्ञक(अव्यवहारिक) इति कथ्यते। प्राणादिमूर्तसंज्ञक–अमूर्तसंज्ञकेषु विमर्शनात्मकः –

१० दीर्घाक्षर उच्चारणकालः – १ प्राणः – १० विपलाः

६ प्राणः (१० X ६) – ६० विपलाः – १ पलाः

६० पलाः – १ नाडी, ६० नाडी – १ अहोरात्रम् (नाक्षत्रम्),

३० अहोरात्रम् – १ मासः

---

४ सूर्यसिद्धान्तः १.१०

यथा ब्राह्म–दिव्य–पित्र्य–प्राजाप्रत्य–गौरव–सौर–सावन–चान्द्र–नाक्षत्राः – एते नवविधकालमानाः कथ्यन्ते। अथ विविधकालमानानां गणनारम्भे उक्तम् –

लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव।

मधोः सितादेर्दिनमासवर्षयुगादिकानां युगपत्प्रवृत्तिः।।[५]

सृष्ट्यादौ कालप्रवृत्तिगणनार्थे दिनमासवर्षयुगादिकानां निर्णयः प्रथमं सूर्योदयाधारेण स्यात्। अथ कमलोद्भवो ब्रह्मा जडचेतनं विश्वं सृजति। एतत्काले भचक्रे सूर्यादिग्रहा अश्विनीनक्षत्रे निवेशितास्तथा च तत्कालात् कालगणनारम्भो निर्धारणं कृतम्। तदनन्तरं लङ्कानगर्यां भानोः सर्वप्रथमोदयः। निरक्षदेशे ० अक्षांशे सूर्योदयः प्रथमो बभूव। तेनैवादित्यवारः प्रथमं बभूव। चैत्रमासे शुक्लपक्षे प्रतिपात्तिथौ सौरादिमासानां, वर्षाणां, युगानां, मन्वन्तराणां कल्पस्य च तदैव प्रवृत्तिः कृता।

अथ ज्योतिषशास्त्रमतिप्राचीनमिति मन्यते। कालविभाजनार्थमुक्तम्।[६]

(१) अन्धकारयुगम् आदिकालतः १०,००० ख्रि. पूर्वपर्यन्तं संसारस्य सर्वविषयक इतिहासारम्भः, इति विद्वज्जना मन्यन्ते। यत्काले ज्योतिषविषयकं सम्पूर्णज्ञानमध्यात्मप्रिय–ऋषीणां विचारधारातो लभ्यते।

(१) उदयकालः – १०,००० तः ५०० ख्रि. पूर्वपर्यन्तमादिकालः ५०० ख्रि. पूर्वतः ५०० ख्रि. पर्यन्तम्।

(२) पूर्वमध्यकालः – ५०० ख्रि.तः १००० ख्रि. पर्यन्तम्।

(३) उत्तरमध्यकालः – १००० ख्रि. तः १६०० ख्रि. पर्यन्तम्।

(४) आधुनिककालः – १६०० ख्रि. तः –अद्यावधिकालपर्यन्तं केषांचन भारतीय

---

५ सिद्धान्तशिरोमणिः १.१५

६ मुहूर्तचिन्तामणिः प्राक्कथनम् – पृ. ६

विद्वज्जनानामतेन २६००० वर्षप्राचीनं ज्योतिषशास्त्रम्। किन्तु भारतीयपरम्परायामेव ज्ञानाधारो वेद अपौरुषेय एवमनन्तः। कल्पारम्भत अधुना कोटिद्वयवर्षाणि व्यतीतानि। यदाधुनिकवैज्ञानिका अपि मन्यन्ते। कल्पारम्भकालतो ज्योतिषशास्त्रस्य रचनाकाल इति मन्यन्ते यत्काले, आरम्भकाले ज्योतिषं बीजरूपेण संस्थितम्।

## १.१.३ ज्योतिषस्य द्विविधत्वं (खगोलं-फलितं) -

भारतीयज्योतिषशास्त्रे संस्कृत-प्राकृतभाषायां ज्योतिषसम्बन्धिन अनेके ग्रन्था उपलभ्यन्ते। तेषां मुख्यत्वेन विभागद्वयम्- (१) गणितज्योतिषम् (२) फलितज्योतिषम् इति। जैनाचार्यमतेऽपि ज्योतिषस्य गणितं फलितमिति द्विषु भागेषु विभक्तम्।

**गणितं ज्योतिषम्** --

इदं विज्ञानात्मकम्। ग्रहाणां गतिमेवं स्थितिकालं लब्ध्वा कालगणनार्थमुपयोगः कर्तुं शक्यते। जैनाचार्यैर्गणितसिद्धान्तेन ग्रहाणां गति-स्थिति-वक्री-मार्गी-मन्दफल-सूक्ष्मफल-कुज्या-त्रिज्यादिकं प्रतिपादितम्। पाटीगणित-बीजगणित-रेखागणित-त्रिकोणमिति-गोलीयरेखागणित-शृङ्गोन्नति - पञ्चाङ्गनिर्माण - जन्माङ्गचक्रनिर्माण - ग्रहयुति - उदयास्तादिकं गाणितिकं निरूपणं गणितज्योतिषे वर्तते।

**फलितज्योतिषं** --

जगतो मूलभूतसौरसिद्धान्ताधारेण गणितफलितज्योतिषयोर्विकासो मनोः पश्चात्सहस्त्रवर्षानन्तरसमुद्भवः। ग्रहाणां स्थित्यधारेण यच्छुभाशुभनिरूपणं क्रियते, तत् फलितज्योतिषमित्युच्यते। जैनाचार्यमतेन पञ्चाङ्ग-ग्रहस्वरूप-योग-जातकस्य जन्मकालिकग्रहाणां फल-मुहूर्त-समय-दिक्-देहशुद्धि- इत्यादीनां विषयाणां परिज्ञानं कथ्यते। फलितस्कन्धे पञ्चभेदाः सन्ति।

१ **जातकम्** – जन्मकालद्वारा प्राणिनां जीवनसम्बन्धिनः सर्वप्रकारकफलानां कथनम्। जन्मकालिकज्ञानं विना प्राणिनां जीवनमन्धकारमयं स्यात्। यस्य नास्ति किल जन्मपत्रिका तस्य जीवनं दीपहीनमिव मन्दिरं निश्यन्धकं भवति।

२ **ताजिकम्** – ताजिकविभागे वर्षफल–मासफलादिनिर्णयः स्यात्। यवनैस्ताजिकशास्त्रे विशेषप्रगतिः साधिता। श्रीनीलकण्ठाचार्यस्ताजिकशास्त्रे विशेषाध्ययनं कुर्वन् ताजिकनीलकण्ठी नामकं ग्रन्थं निर्मितवान्।

३ **मुहूर्तम्** – मुहूर्तविभागे जातकर्मादिविषयकसमस्तमुहूर्तानां समावेशः।

४ **प्रश्नः** – प्रश्नविभागे प्रश्नादिविचारः कथितः।

५ **संहिता** – ग्रहचारादिफलमतिरिक्ता वास्तुशकुनादिविषया अत्र समाविष्टाः।

अष्टाङ्गनिमित्तमपि फलितज्योतिषस्याङ्गं मन्यते। निमित्तं नाम लक्षणानि दृष्ट्वा भूतानामेवं भविष्याणां घटितघट्यमानघटनानां निरूपणं क्रियते, तन्निमित्तं कथ्यते। तत्र शरीरे स्थितानां तिलादिव्यञ्जकचिह्नैर्हस्तपादादिष्वङ्गेषु ध्वनिरेवं स्वरः, भूमिसम्बन्धिनः, वस्त्रच्छेदनं, ग्रहाणामुदयास्ता;, शङ्खचक्रकलशादिलक्षणाणि, स्वप्नविचारः– एते विषयाः सम्मिलिता भवन्ति।

गणितज्योतिषस्यापेक्षया फलितज्योतिषस्य विकासः प्रथमं प्रादुर्भवत्। कारणमादिमानवानां स्वस्वकार्यसिद्धिप्राप्त्यर्थे समयनिर्धारणमावश्यकमस्ति। चतुर्वेदेषु, वेदाङ्गकाले रामायण–महाभारतकालीनज्योतिषे समयशुद्धिविधानं दरीदृश्यते। ग्रहगणितविषये विवेचनं सूर्यसिद्धान्तः–पञ्चसिद्धान्तिकादिग्रन्थेषु प्राप्यते। खगोलशास्त्रवत् फलज्योतिषमपि प्राचीनशास्त्रं विद्यते। वेदकाले यद्यपि नक्षत्रज्योतिषस्य महत्त्वमतीवदृष्टिगोचरं भवति। तथापि फलज्योतिषस्य मूलरूपं वेदेषु निहितमिति निश्चयेन वक्तुं शक्यते। शुक्लयजुर्वेदे फलज्योतिषस्यैकस्मिन्मन्त्रे समुल्लेखः – प्रज्ञानाय नक्षत्रदर्शं शिक्षायै प्रश्निनं ग्रामण्यं

गणकमिति (शु. श. ३०, १०)। अत्रेदं सिद्धं भवति। तस्मिन् समये नक्षत्रदर्शनं, नक्षत्रदर्शनद्वारा ज्योतिषं वा प्रश्नविद्या, गणकविद्या प्रचलितासीत्। मुण्डकोपनिषदि परापराविद्ययोर्वर्णनप्रसङ्गे ज्योतिषशास्त्रस्य निर्देशो वर्तते। अथर्ववेदस्य नक्षत्रसूक्ते (१९.७) विविधानामभिजित्सहितानां नक्षत्राणां शुभाशुभफलस्य वर्णनं मन्त्रेषु दरीदृश्यते। कृत्तिकानक्षत्रादारभ्य नक्षत्राणां समुल्लेखो निर्देशमर्हति। कार्यं शोभने कृतं सफलतां प्राप्नोति। अयं मुहूर्तशास्त्रको विचारो वैदिकसाहित्येऽपि विविधस्थानेषु दरीदृश्यते।

तैत्तिरीयब्राह्मणे पुण्य–पापनक्षत्राणां निर्देशस्तथा कृषिकर्मप्रारम्भार्थं मैत्रस्य–अनुराधानक्षत्रस्य विचारः प्रतिपादितः। उक्तं यथा – मैत्रेण कृषन्ते (१–८–४–२) स्वातीनक्षत्रोपरि कन्यादानमहत्त्वं प्रतिपादितम्। उक्तं यथा - यां कामयेद् दुहितरं निष्ठ्यायां दद्यात् प्रियैव भवति, न पुनरागच्छति (१.५.२)। पारस्करगृह्यसूत्रे पुण्याहे लाङ्गलयोजनम्–इति प्रतिपादितम्।[७]

## १.१.४ ज्योतिषस्य त्रिविधत्वम् —

कालान्तरेण ज्योतिषशास्त्रं सिद्धान्तः–गणितम्–फलितम् इति त्रयस्कन्धेषु विभक्तम्। वराहमिहिरेण बृहत्संहिताग्रन्थ उक्तम् (१.९)-

ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तत्राभिधानस्त्वसौ
होरान्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।।

---

७ प्रो. मु.ला. वाडेकरः – वेदेषु विज्ञानम्- देवसायुज्यम्, मार्चमासः २००८

**सिद्धान्तगणितम्** –

यत्र त्रुट्यादितः प्रलयान्ता कालगणना, एवं सौरचन्द्रादिविविधकालमानादिकं पृथ्वीनक्षत्रग्रहाणां वर्णितम्। सिद्धान्तशिरोमणिग्रन्थे निम्नश्लोकेन तस्य परिभाषा दर्शिता –

त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदस्तथा
चारश्च द्युसदां द्विधा च गणितप्रश्नास्तथा सोत्तराः।
भूधिष्ण्यग्रसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधः।।[८]

**फलितज्योतिषम्** -

फलितस्कन्धे जातक–ताजिक–मुहूर्त–प्रश्न–संहिता एते मुख्यतः पञ्चभेदाः सन्ति।

१. जातकम् – जन्मकालद्वारा प्राणिनां जीवनसम्बन्धिनः फलं जातकमिति कथ्यते। उक्तम्–

यस्य नास्ति किल जन्मपत्रिका
या शुभाशुभफलप्रदायिनी।
अन्धकं भवति तस्य जीवितं
दीपहीनमिव मन्दिरं निशि।।[९]

२. ताजिकम् – वर्षफलं मासफलादिज्ञानं लभ्यते।

३. मुहूर्तम् – जातकर्मादिसकलमुहूर्तानां वर्णनम्।

४. प्रश्नः – मूकप्रश्नादिकं वर्णितम्।

---

८ सि.शि. अ.१श्लो.६

९ बृ.सं. भूमिका पृ.५

**संहिता -**

यस्मिन् फलितज्योतिषस्य प्रधानाङ्गे ग्रहचारादि- वायसविरुत-शिवारुत-मृगचेष्टित-श्वचेष्टित-गवेङ्गित-अश्वेङ्गित-हस्तिचेष्टित-शकुनादिविषयानां समावेशः। कालान्तरेण ज्योतिषशास्त्रं सिद्धान्त-संहिता-होरा-इति त्रयस्कन्धेषु विभक्तम्। नारदसंहिताग्रन्थ उक्तम्-

सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम् ।
वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमनुत्तमम्।[१०]

१ सिद्धान्तः - ग्रहनक्षत्राणां स्थितिः, गतिः, ग्रहानयनं, ग्रहाणामुदयास्ताः, पञ्चाङ्गमेवं सृष्ट्यादिप्रलयन्तकालस्य सिद्धान्ताः प्रतिपादिताः सन्ति। सिद्धान्ते त्रयो भेदाः सन्ति। ते च सिद्धान्तः तन्त्रं करणमिति। सिद्धान्तगणितं कल्पतो गाणितिकविधिं निर्दिशति। भास्कराचार्येण विरचितसिद्धान्तग्रन्थेषु कल्पादि-आधारेणाहर्गणानयनं कृतम्। अहर्नाम गणानां समूहः, संख्येति वा। निश्चितवारज्ञानार्थेऽहर्गणानयनमावश्यकम्। **तन्त्रम्** - तन्त्रविभागे सृष्ट्यादित इष्टदिनपर्यन्तमहर्गणानयनं साधयेत्। ग्रहगणितप्रक्रिया निरूपितास्ति। स्वयं भगवानसूर्य उपदेष्टि सूर्यसिद्धान्तम्, आर्षग्रन्थे अहर्गणानयनं युगादि-आधारेण साधितम्। **करणम्** -करणविभागे कल्पितेष्टयुगं मत्वा तद्युगेऽभीष्टदिनस्याहर्गणानयनं कृत्वा ग्रहानयनप्रक्रिया निरूपितास्ति। यथा गणेशदैवज्ञेन विरचितग्रहलाघवग्रन्थे, करणग्रन्थे शकादि-आधारेणाहर्गणानयनं निरूपितमस्ति। सिद्धान्तग्रन्थेषु -आर्यभट्टः, लल्लः, ब्रह्मगुप्तः, वराहमिहिरः, भास्कराचार्यः, गणेशदैवज्ञः, नृसिंहदैवज्ञः, केशवदैवज्ञः -इत्यादीनां दैवज्ञानां सिद्धान्तग्रन्था: प्रचलिताः सन्ति।

---

१० ना.सं. अ. १. श्लो. ४

२. **होरा** — जातकस्य जन्मकालिकखगोलीयग्रहस्थित्यधारेण, विशिष्टग्रहयोगेन तस्य जीवनस्वरूपं निश्चितं कर्तुं शक्नोति। तज्जन्मकालिककुण्डल्यनुसारं, जीवनान्तपर्यन्तस्य शुभाशुभफलादेशो जातकग्रन्थेषु समाहितः।

होराशब्दस्य व्युत्पत्तिः —

अहश्च रात्रिश्च- अहोरात्रं, तदेव होराशब्देनोच्यते।

आद्यन्तवर्णलोपाद् होरास्माकं भवत्यहोरात्रात्।

तत्प्रतिबद्धश्चात्र ग्रहभगणश्चिन्त्यते यस्मात्।।[११]

अहोरात्रशब्दस्याद्यवर्णो अ तथा अन्तवर्णः त्र, एतयोर्लोपात् होराशब्दो व्युत्पद्यते। प्रवहवेगकारणेनैकस्मिन्नहोरात्रे कालवशान्मेषादिद्वादशराशयो भ्रमणं कुर्वन्ति।

१ दिनं + १ रात्रिः = १ अहोरात्रम्

मेषादिद्वादशराशयः (१ भगणम्) = १२ राशयः

अतो १ राशिलग्नं = २ कलाकात्मकमिति। यः कालोऽहोरात्रान्तर्गतः, तल्लग्नं कथ्यते। जातकस्य जन्मकालीनस्थितग्रहाः, तिथिनक्षत्रादियोगेन तस्य सुखदुःखादिनिर्णयः यच्छास्त्रे तच्छास्त्रं होराशास्त्रं जातकशास्त्रं वा कथ्यते। राश्यर्धभागो होरा संज्ञा कथ्यते। पाराशरमतेन होरा तस्यार्धमुच्यते। मार्तण्डेन्द्वोरयुजि समभे भान्वोश्च होरे । होरा चन्द्रसूर्ययोः कथ्यते। १ राशिः = ३०° अतः १५° चन्द्रस्य, १५° सूर्यस्य होरा कथ्यते। समराशौ (वृषभ-कर्क-कन्या-वृश्चिक-मकर-मीनेषु)प्रथम ०° तः १५° चन्द्रहोरा कथ्यते। विषमराशौ (मेष-मिथुन-सिंह-तुला-धनु-कुम्भेषु) द्वितीय १५° तः ३०° सूर्यहोरा कथ्यते। एतत्प्रकारेण चन्द्रसूर्ययोर्होराधारेण जातकस्य शुभाशुभफलनिर्णयः कर्तुं शक्यो भवति। शुभाशुभकृत्येषु

---

११ सारावली : अ. २ श्लो.२

निर्णयार्थे, सूर्यादिसप्तग्रहाणां होरापरत्वे तत्सम्बन्धिनिश्चितकार्यं कर्तव्यम्। तत्र सूर्यहोरापरत्वेनोद्वेगः, चन्द्रपरत्वेनामृतं, भौमपरत्वेन रोगः, बुधपरत्वेन लाभः, गुरुपरत्वेन शुभं, शुक्रपरत्वेन चलं तथा शनिपरत्वेन कालहोरा इति फलं प्राप्नोति। स्पष्टसूर्योदयतः स्पष्टसूर्यास्तपर्यन्तं द्वादशहोरा भवन्ति। एवं स्पष्टसूर्यास्ततः स्पष्टसूर्योदयपर्यन्तं द्वादशहोरा भवन्ति। एतत्प्रकारणैकस्मिन्नहोरात्रे चतुर्विंशति होरा भवन्ति। अतः १ होरा – १ कलाकस्य भवति। तत्र रव्यादिवारेषु क्रमेण प्रथमहोराश्चत्वारश्च भवन्ति। अनन्तरं षष्ठ्यादिक्रमेण द्वितीया, एवमन्या ज्ञेयाः। होराविषये बृहत्संहितायामुक्तम् —

होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः। ( १.९ )

होराशब्दस्य व्युत्पत्तिरहोरात्रशब्देन ज्ञायते। तस्य द्वितीयं नाम जातकमिति कथ्यते। जातकोत्पत्तिसमये स्थितिः, नक्षत्र–तिथि–योग–करण–वारादिफलम्, एवं जन्मनक्षत्र–जन्मलग्नाधारेण शुभाशुभफलादेशो होराशास्त्रे विद्यते।[१२]

लघुजातकग्रन्थ उक्तम् --

यदुपचितं यज्जन्मनि शुभाशुभं तस्य कर्मणः पक्तिम्।

व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव ।। लघुजातकम्–१. ३

कलिन्दिकाप्रकाशग्रन्थ उक्तम् –

कालाधीनफलोपदेशादिह स्याज्ज्योतिषं संहिता होरा सद्गणिताभिधैः प्रवर्तितं स्कन्धैस्त्रिधा । तत्र ह्युत्पातग्रहगोचरमुखैर्मौहूर्तिकैः शाकुनैर्वर्षार्धस्वरदेहचिह्नविषयैः स्यात् संहिताशासनैः।[१३]

---

१२ भद्रबाहुसंहिता प्रस्तावाना पृ.१०

१३ कलन्दिकाप्रकाशः पृ.२८

**होराशास्त्रस्यावश्यक्ता, महत्त्वं च –**

अर्थार्जने सहाय: पुरुषाणामापदर्णवे पोत:।

यात्रासमये मन्त्री जातकमपहाय नास्त्यापर:।।[१४]

जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा।

अथवा दैवविमर्शनपर्याय: खल्वयं शब्द:।।[१५]

भाग्यविचारपर्यायवाची शब्दो होरा कथ्यते। होराशास्त्रं संसारेषु प्रसिद्धं जातकशास्त्रं मनुष्याणां जीवने धनार्जने सहायं करोति। अथ शुभग्रहाणां दशायां शुभं तथा च पापग्रहाणां दशाकाले तत्सम्बन्धिनमशुभफलं जातक: प्राप्नोति। आपत्तिकाले होराशास्त्रमुत्तमं मार्गदर्शकं भवति। यात्रासमये होराशास्त्रं विहाय कोऽपि मार्गदर्शको नास्ति। अत इदं महत्त्वपूर्णं शास्त्रमिति कथ्यते। खगोले तेज:पुञ्जपिण्डानां नक्षत्राणामेवं ग्रहाणां बिम्बेषु स्वाभाविका शुभाशुभगुणधर्मा विद्यमाना: सन्ति। किन्तु तत्र पारस्परसाहचर्येण, तात्कालिकसम्बन्धेन विशेषशुभाशुभरूपेण फलं परिवर्तते। अस्य प्रभव: पृथिव्यां स्थितानां समस्तप्राणिनामुपरि पूर्णरूपेण भवति। जन्मनक्षत्रमेवं जन्मलग्नाधारेण फलादेशकथनं होराशास्त्ररूपस्य ज्योतिषशास्त्रस्य मुख्य उद्देश:। तत्र रमलं (रमलशास्त्रं) यवनप्रणीतम्। सारावली, बृहज्जातकं, जातकपारिजातं, फलदीपिका, जातकालङ्कार:, बृहत्पाराशरहोराशास्त्रं, लघुपाराशरी, ताजिकनीलकण्ठी –आदयो नैके ग्रन्था होराजातकग्रन्था: प्रसिद्धा:।

३ **संहिता** — देशस्य कालस्य तथा समस्तप्राणिनां शुभफलबोधको ग्रन्थ: संहिता कथ्यते। भूकम्प:, भूस्खलनं, वैनाशिको झंझावात:, प्राकृत्तिकविपत्तिकाले भवित्री धन-जनहानि:-इत्यादयो विषया ज्योतिषस्य संहितास्कन्धान्तर्गता:। संहिताशास्त्रविषयाणां

---

१४ सारावली अ. २. श्लो. ५

१५ सारावली अ. २. श्लो. ४

विकासोऽथर्ववेदादारभ्य सूत्रकाले विशेषरूपेणाभवत्। तस्य विकासो जीवनस्य व्यवहारिकक्षेत्रेषु ज्योतिषविषयकतत्त्वानां स्थानं प्रदातुं स्यात्।

संहिताशास्त्रं ज्योतिषशास्त्रस्य प्रथमप्रादुर्भाव इति मन्यते। संहिताग्रन्थेषु निमित्तं, वास्तुशास्त्रं, मुहूर्तशास्त्रं, प्रश्नशास्त्रं, सामुद्रिकशास्त्रं, स्वप्नविचारः, अङ्गस्फुरणं, पल्लीपतनं, उत्पाताः, वृष्टिज्ञानम्, अरिष्टं, एवं शकुनम्- एते विषयाः समाविष्टाः। ग्रहचारातिरिक्तं वायसविरुतं, शिवारुतं, मृगचेष्टितं, श्वचेष्टितं, गवेङ्गितम्, अश्वेङ्गितं, हस्तचेष्टितं -आदीनां विस्तृतं विवेचनमुपलभ्यते। जैनाचार्याणां दृष्ट्या संहिताग्रन्थेष्वष्टाङ्गनिमित्तेन सहायुर्वेद एवं क्रियाकाण्डमपि समाविष्टमस्ति। अष्टाङ्गनिमित्तज्ञानं फलितविषयान्तर्गतमपि किन्तु प्रधानत एतन्निमित्तज्ञानं संहितान्तर्गतं स्यात्। संहिताग्रन्थेषु निमित्तानामष्टौ भेदाः कथ्यन्ते। यथा व्यञ्जन-अङ्ग-स्वर-भौम-छन्न-अन्तरिक्ष-लक्षण-स्वप्नानि।[१६]

**अष्टाङ्गनिमित्तम्-**

यल्लक्षणानि दृष्ट्वा भूतानामेवं भविष्यद्घटनानां निरूपणमस्ति, तन्निमित्त इति कथ्यते।

१. **व्यञ्जनम्** - तिल-मसादिकं दृष्ट्वा शुभाशुभफलनिर्णयो व्यञ्जननिमित्ताधारेण कथ्यते। नराणां दक्षिणे भागे तथा च स्त्रीणां वामभाग उपर्युक्तचिह्ना भवेयुः शुभावहाः कथ्यन्ते।

२. **अङ्गम्** - हस्तपादललाटनासिकानेत्रमस्तकवक्षस्थलाद्यङ्गानि दृष्ट्वा शुभाशभफलनिरूपणं कारयेत्, तदङ्गनिमित्तं कथ्यते। उन्नताङ्गाः सुलक्षणाः कथ्यते।

३. **स्वरः** - चेतनप्राणिनां स्वरास्तथा चाचेतनविषयाणां वस्तूनां शब्दान् श्रुत्वा शुभाशुभनिर्णयः स्वरनिमित्तं कथ्यते।

---

१६ भद्रबाहुसंहिता प्रस्तावना पृ.१८-४१

४. **भौमम्** – भूमिसम्बन्धिनो विषयाः– यथा वर्णः, स्निग्धगन्धादिकं शुभाशुभत्वं भौमनिमित्तं कथ्यते।

५. **छन्नम्** – वस्त्रशस्त्रासनच्छत्रादिकं छिद्येद् तद्दृष्ट्वा शुभाशुभनिर्णयः छन्ननिमित्तं कथ्यते।

६. **अन्तरिक्षम्** –नक्षत्राणामुदयास्तयोः शुभाशुभफलकंथनमन्तरिक्षनिमित्तं कथ्यते।

७. **लक्षणम्** – स्वस्तिक–कलश–शङ्ख–चक्रादिचिह्नद्वारा तथा च हस्त–मस्तक–पदतलानां रेखया द्वारा शुभाशुभफलकथनं लक्षणनिमित्तं कथ्यते। करलक्षणं दृष्ट्वा लाभ–हानी, सुख–दुःखं, जीवन–मृत्यू, जय–पराजयौ, स्वास्थ्य–अस्वास्थ्यादिकं रेखानुसारेण मनुजेन फलं प्राप्तं भवति।

८. **स्वप्ननिमित्तम्** – स्वप्नाधारेण शुभाशुभफलकथनं स्वप्ननिमित्तं कथ्यते। दृष्ट–श्रुत–अनुभूत–प्रार्थित–कल्पित–भाविक–दोषजाः– एते सप्तप्रकाराः। स्वप्नाधारेण भावि यथार्थफलं प्राप्यते। स्वप्नः कर्मफलसूचकः, तथा भावि शुभकर्मफलं सूचितं भवति ।

प्रश्नशास्त्रमपि निमित्तशास्त्रस्य प्रधानमङ्गम्। तत्र गणितक्रियां विना भूतभविष्यवर्तमानादिकास्त्रिकालविषयाः कथयितुं शक्यन्ते। प्रश्नज्योतिषं मनोविज्ञानसम्बन्धितं संलग्नं च भवति। तत्र प्रश्नाक्षरं, प्रश्नलग्नं तथा स्वरज्ञानविचारः कर्तव्यः। निमित्तशास्त्रान्तर्गते शकुनज्योतिषे शुभाशुभफलनिर्णयः कर्तुं शक्यो भवति। वेद–उपनिषद्–पुराण–निरुक्त–व्याकरण–धर्मशास्त्र–साहित्यादिग्रन्थेषु ज्योतिषस्य विषय उपलभ्यते।

चक्षुस्थानीयज्योतिषपरत्व आचार्यसायणेनोक्तम् –

प्रत्यक्षेणानुमित्वा वा वस्तूपायो न बुध्यते।

एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता ।।[17]

अप्रदीपा यथा रात्रिरनादित्यं यथा नभः।

तथासांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि।।[18]

इति बृहत्संहितायामुक्त्वा वराहमिहिरेण ज्योतिषस्य महत्ता प्रतिपादिता। भास्कराचार्येण सिद्धान्तशिरोमणिग्रन्थे षडङ्गवेदाङ्गे ज्योतिषस्यातिमहनीयस्थानं प्रतिपादितम्–

शब्दशास्त्रं मुखं ज्योतिषं चक्षुषी

श्रोत्रमुक्तं निरुक्तं च कल्पः करौ ।

या तु शिक्षास्य वेदस्य सा नासिका

पादपद्मद्वयं छन्द आद्यैर्बुधैः।। [19]

मोनियर-विलियम्स्महोदयो लिखति, यदरबीजनैर्हिन्दूनां सकाशादेव बीजगणितस्य ज्ञानं संप्राप्तम्। बीजगणितभूमितिशास्त्रयोः शोधो हिन्दूनामेवास्ति तयोश्च तैः खगोलस्य संशोधनकृते समुयोगः कृतः। तत् खगोलज्ञानमपि तेषामेव वरिवर्ति। कोलब्रुकमहाभागोऽपि सुस्पष्टं निर्दिशति यद्बीजगणितस्य खगोलसंशोधनस्य कृते तथैव भूमितिप्रयोगाणां विषये समुपयोगः कर्तुं शक्यते- इति हिन्दूनां भारतीयानां संशोधनम्। तदुपयोगस्तैर्यथा कृतः स त्वद्यावधिः प्रशंसाया विषयः। हन्स स्लीपरमहानुभावेन १९०८ ख्रिस्ताब्दे ग्रहतारादिदर्शनयन्त्रस्य निर्माणं कृतम्। तत्पूर्वमस्माकं महर्षिभिस्तेषां दूरदृष्ट्या आर्षदृष्ट्या चानेकानि संशोधनानि खगोलशास्त्रे कृतानि प्रशंसार्हाणि सन्ति। महर्षिभिर्मन्त्रेऽपि पृथिवी वर्तुलाकारा सूर्यं प्रदक्षिणीकरोतीति विदुषां मतं प्रस्थापितम्। शुक्लयजुर्वेदे सूर्यस्य

---

१७ बृ.सं. प्रस्तावना - पृ. ३, व.सं. प्राक्कथनम् –पृ.१८

१८ बृ.सं. २.२४

१९ सि.शि. अ.१ श्लो.१०, बृहत्संहिता प्रस्तावना पृ. – ४, नारदसंहिता विहङ्गमदृष्टिः पृ.- ९

स्वयंप्रकाशत्वं चन्द्रस्य परप्रकाशत्वं तथा च नक्षत्राणां समुल्लेखः कृतो दरीदृश्यते। सूर्यस्य रथे सप्ताश्वा भवन्ति, ते च सूर्यरथं वहन्ति। आधुनिककाले सूर्यरश्मिषु सप्तैव वर्णाः सन्ति तदेव वैज्ञानिकतथ्यं सूचितमिति। वर्षस्य द्वादशमासाः, अहोरात्रस्य ३६० दिनानि भवन्ति। इदं तत्त्वं मन्त्र ऐतरीयब्राह्मणे सुस्पष्टतया निर्दिष्टमस्ति। शुक्लयजुर्वेदेऽधिकमासस्य अंहस्पतिरूपेण मलिम्लुचशब्देन च गणनं परिदृश्यते। षड्ऋतूणाम् ऋत्वनुसारं मासानां नामोल्लेखो तथा च सप्तविंशतिनक्षत्राणां समुल्लेखो शब्दान्तरेण दरीदृश्यते। आधुनिकवैज्ञानिको लिखति। वैदिकैः ४३८३ वर्षेभ्यः पूर्वं यद् दिनानां गणना कृतास्ति, सा केसीनीनेयरादीनां गणनया एकेन निमिषेणापि न भिन्नास्ति।[२०] वेदेष्वनेका फलज्योतिषसिद्धान्ता दरीदृश्यन्ते। ऋग्वेदे ऋतु-अयन-वर्ष-दिन संवत्सरादिसंहितानां मूलभूतसिद्धान्ताः परिगणिताः सन्ति। अथर्ववेदे कृषिसम्बन्धिनो नानाविधविषयास्तथा विभिन्नप्रकारकनिमित्तानां वर्णनमस्ति। जय-पराजयविषयकनिमित्तानि तथा विभिन्नप्रकारकशकुनानि वर्णितानि सन्ति। ज्योतिषशास्त्रस्य बीजसूत्राण्यथर्ववेदारिक्तमाश्वलायनगृह्यसूत्रं, पाणिनीयव्याकरणं, मनुस्मृतिः, याज्ञवल्क्यस्मृतिः, महाभारतं, कौटिलीयार्थशास्त्रं, स्वप्नवासवदत्तनाटकमेवं हर्षचरितादिप्रभृतिग्रन्थेषु विद्यन्ते।

### १.१.५ आश्वलायनगृह्यसूत्रे —

श्रावण्यां पौर्णिमास्यां श्रवणाकर्म ..... ।[२१] सीमन्तोनयनमापूर्यमाणपक्षे........।[२२] यदा पुंनक्षत्रेण चन्द्रमा युक्तः स्यात्। एतेषु वाक्येषु मुहूर्तादिभिर्विभिन्नसंस्कारणां समयशुद्धिरेवं विविधविधानानां विवेचनं कृतास्ति।

---

२० प्रो. मु.ला. वाडेकरः-वेदेषु विज्ञानम्- देवसायुज्यम्, मार्चमासः २००८

२१ आश्व. गृ. २.१

२२ आपूर्यमाणपक्षे यदा पुंसानक्षत्रेण चन्द्रमा युक्तः स्यात्।।२।।१/१२/२

### १.१.६ पारस्करगृह्यसूत्रे —

त्रिषु त्रिषूत्तरादिषु स्वातीमृगशिरसि रोहिण्यामित्यादिसूत्रे –उत्तराफाल्गुनी–हस्त–चित्रा–उत्तराषाढा–श्रवण–धनिष्ठा–उत्तराभाद्रपदा–रेवती–अश्विनी–स्वाती–मृगशीर्ष–रोहिणी– एतानि नक्षत्राणि विवाहनक्षत्राणि प्रोक्तानि।[२३]

### १.१.७ साङ्ख्यायनगृह्यसूत्रे —

मधुमक्षिकयास्मद्गृहे स्वगृहनिर्माणं[२४] तथा काकस्य मध्यं रात्रौ शब्दकरणमशुभं[२५] प्रतिपादितम्।

### १.१.८ निरुक्ते --

दिन–रात्रि–शुक्लपक्ष–कृष्णपक्ष–उत्तरायण–दक्षिणायनादीनां व्युत्पत्तिर्न शाब्दिकी, अपि तु परिभाषात्मिका दृश्यते।[२६]

### १.१.९ पाणिनिव्याकरणे —

स्वाष्टाध्यायीषु संवत्सर–हायन–चैत्रादिमास–दिन–विभागात्मको मुहूर्तशब्दो विद्यते। पुष्य–श्रवण–विशाखादीनां समुल्लेखो वर्तते। वाताय कपिला विद्युत् – उदाहरणद्वारा निमित्तशास्त्रस्य विद्युत्–निमित्तविषय उक्तम्। तथा च कपिला विद्युद् वायोर्वहनं सूचयेत्। विभाषाग्रह (३,१,१४३)शब्दे ग्रहशब्दोल्लेखो नवग्रहाणां द्योतक इत्यनुमीयते। यद्ग्रन्थे संहिताशास्त्रस्य नैकानि बीजसूत्राणि विद्यन्ते।[२७]

---

२३ उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात्।।५।। त्रिषु त्रिषूत्तरादिषु।।६।। स्वातौ मृगशिरसि रोहिण्यां वा।।७।। – १–४(५.६.७)

२४ यदि गृहे मधूका मधु कुर्वन्ति।।।१।। ५.९.१

२५ निशायां काकशब्दक्रान्ते च।।४। ५.५.४

२६ निरुक्तम् १४.८–९, शं. बा. दीक्षित – भारतीयज्योतिषशास्त्राचा इतिहास पृ. १०२

२७ शं. बा. दीक्षित – भारतीयज्योतिषशास्त्राचा इतिहास पृ. १०३

### १.१.१० मनुस्मृतिग्रन्थे —

सिद्धान्तग्रन्थसमानं युगमानमेवं कल्पमानं वर्णितमस्ति। निर्घाते भूमिचलने ज्योतिषां चोपसर्जने (४.१०५) इति लक्षणशास्त्रविषय एवं शकुनशास्त्रविषय उक्तम्। विद्युत्-स्तनितवर्षेषु महोल्कानां च सम्प्लवे (४.१०३), एवं पांसुवर्षे दिशा दाहे (४.११५)- एते श्लोकाः शकुनसम्बन्धिनः सन्ति। न चोत्पातनिमित्ताभ्यां नक्षत्राङ्गविषयाः (६.५०) श्लोक उत्पात- निमित्त-नक्षत्र –अङ्गविद्यादिकं वर्णितमस्ति। एतत्प्रकारेण मनुस्मृतिग्रन्थे संहिताशास्त्रस्य बीजसूत्रं विद्यमानमस्ति।

### १.१.११ याज्ञवल्क्यस्मृतिग्रन्थे --

नवग्रहाणां स्पष्टोल्लेखः(१.२९६), क्रान्तिवृत्तस्य द्वादशभागा निरूपिताः सन्ति। तत्र मेषादिद्वादशराशयः सिद्धिदाः। श्राद्धकालाध्याये वृद्धियोगः कथितः। यत्संहिताशास्त्रस्य २७ योगानामुल्लेखो दृश्यते। प्रायश्चित्ताध्याये ग्रहसंयोगजैः फलैः –इत्युक्त्वा ग्रहसंयोगजन्यफलं कथितम्। याज्ञवल्क्यस्मृतौ ग्रहाणां महत्त्वं प्रतिपाद्य ग्रहशान्तिविधानं कृतम्। तत्र स्पष्टं ग्रहफलमुक्तम्-

सूर्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः।(१.२९६)
ग्रहाधीना नरेन्द्राणामुच्छ्रायाः पतनानि च।
भावाभावौ च जगतां तस्मात्पूज्यतमा ग्रहाः।।(१.३०८)

### १.१.१२ महाभारते —

युगपद्धतिर्मनुस्मृतिसदृशी दृश्यते। कल्पकालनिरूपणं शान्तिपर्वस्य १८३ अध्याये विस्तृतरूपेण वर्णितमस्ति। पञ्चयुगसम्बन्धितपञ्चवर्षाणां क्रमेण पञ्चपाण्डवानामुत्पत्तिर्वर्णितास्ति। अनुवत्सरजाता अपि ते कुरूत्तमाः। पाण्डुपुत्रा व्यराजन्त

पञ्चसंवत्सरा इव ।।(अ. ५, अ. १२४-२४) पञ्चवर्षेष्वधिमासद्वयं भवेत्, यत्र संहिताया विषयोऽन्तर्गतः। सिद्धान्तज्योतिषग्रन्थानां पूर्वे संहिताग्रन्थेष्वधिमासः निरूपितोऽस्ति। महाभारते ६४ अध्याये, समस्तनक्षत्राणां सूचिर्दर्शिता। सप्तविंशतिनक्षत्राधिपानां स्वभावानुसारविधेयनक्षत्रस्य भाविशुभाशुभनिर्णयः कर्तुं शक्यते। शुभनक्षत्रानुसारेण विवाह-यात्रा-युद्धकार्यप्रथा प्रचलितास्ति। ग्रहेषु भौमशनी दुष्टग्रहौ कथितौ। केवलं गुरुः शुभः, समस्तप्राणिनां सुखशान्तिप्रद इति कथ्यते। शनिना सह शुक्रभौमबुधग्रहाणां योगा अशुभाः। तथैकस्मिन्मासे सूर्यचन्द्रयोर्ग्रहणं, तत्र त्रयोदशीदिने ग्रहणयोगः समस्तप्राणिनां कृते भयोत्पादकः।

### १.१.१३ कौटिल्य-अर्थशास्त्रे —

दशमे प्रकरणे युद्धविषयकशकुनं, जय-पराजयद्योतकनिमित्तानां वर्णनमस्ति। यात्रासम्बन्धितशकुनविचारोऽपि विस्तृतरूपेण वर्णितोऽस्ति।

### १.१.१४ हर्षचरिते —

काव्यशैल्या बाणो दुर्निमित्तानां सूचिं प्रददाति। यथा दिने शृगालीरोदनं, कपोता गृहे आगता इत्यादीनि। बाणेन १६ महोत्पाताः, ३ दुर्निमित्तास्तथा २० उपलिङ्गा वर्णिताः।[२८]

### १.१.१५ आदिकालोत्तरवर्ति ज्योतिषशास्त्रम् -

आदिकालोत्तरवर्तिकालो ज्योतिषशास्त्रस्य स्वर्णिमयुगः कथ्यते। यत्काले आर्यभट्टः, लल्लः, वराहमिहिरः, कल्याणवर्मा, ब्रह्मगुप्तः मुञ्जालः, उत्पलः, श्रीधराचार्यः, पद्मनाभः, श्रीपतिः, भोजराजः, ब्रह्मदेवः, शतानन्दः, भास्कराचार्यः- इत्यनेके विद्वांसा बभूवुः। यैः सिद्धान्त- संहिता -होरा- अङ्कगणित- बीजगणित- रेखागणित- जातकग्रन्थ- मुहूर्तग्रन्थ-

---

२८ भद्रबाहुसंहिता प्रस्तावना पृ.१०-१५

सामुद्रिकशास्त्र–रमलशास्त्र–यन्त्रनिर्माणविधि–ग्रहवेधनिरीक्षणप्रकार–भूशोधन–शकुनप्रश्नादि–विचार–दिक्शोधन–शल्योद्धारादिवास्तुविचार–वृष्टिविचार–उल्कापातादिविचाराः – इत्यनेके विषयाः प्रतिपादिताः। केशवार्क–कालिदास–गणेशदैवज्ञ–नृसिंहदैवज्ञ–रामदैवज्ञ–कमलाकर–ढुण्ढिराज–मुनीश्वर– महामहोपाध्यायाः सुधाकर द्विवेदीप्रभृतयो बहवो विद्वांसा आसन्, येषां मेधाशक्त्या ज्योतिषशास्त्रं समृद्धमभवत्। गणेशदैवज्ञेन विरचिता ग्रहलाघव–बृहच्चिन्तामणि–लघुचिन्तामणिग्रन्थाः सिद्धान्तस्कन्धान्तर्गताः। वराहमिहिरस्य पञ्चसिद्धान्तिका, भास्कराचार्यस्य सिद्धान्तशिरोमणिः–करणकुतूहलं, कमलाकरस्य सिद्धान्ततत्त्वविवेकः, श्रीधरस्य त्रिशतिका(पाटीगणितग्रन्थः),ब्रह्मगुप्तस्य ब्रह्मस्फुटसिद्धान्तः–खण्डखाद्यटीका, श्रीपतेः सिद्धान्तशेखरः–धीकोटिदकरणं, प्रथम–आर्यभट्टस्य आर्यभटीयं, द्वितीय–आर्यभट्टस्य लघु–आर्यसिद्धान्तः, लल्लस्य श्रीवृद्धिदतन्त्रं, नृसिंहस्य मध्यमग्रहसिद्धिः, पद्मनाभस्य यन्त्ररत्नावली –इत्यादयो ग्रन्थाः सिद्धान्तग्रन्थरूपेण प्रचलिताः सन्ति। श्रीकल्याणवर्मा विरचिता सारावली, पाराशरमुनिप्रणीतं बृहत्पाराशरहोराशास्त्रं, लघुपाराशरी, श्रीवराहमिहिरविरचितं बृहज्जातकं लघुजातकं च, श्रीदैवज्ञवैद्यनाथस्य जातकपारिजातं, श्रीनीलकण्ठदैवज्ञस्य ताजिकनीलकण्ठी, श्रीकालिदासस्य उत्तरकालामृतं, भट्टोत्पलस्य यात्राटीका, बृहज्जातकटीका, लघुजातकटीका, श्रीढुण्ढीराजस्य जातकाभरणं, फलदीपिका. जातकालङ्कारः, मानसागरी, अद्भुतसागरः– इत्यादयो ग्रन्था जातकग्रन्थरूपेण प्रचलिताः सन्ति। तथा च मुहूर्तविभागे दैवज्ञनारायणस्य मुहूर्तमार्तण्डः, श्रीमद्रामदैवज्ञस्य मुहूर्तचिन्तामणिः–इत्यादयो ग्रन्थाः प्रचलिताः सन्ति।

### १.१.१६ संहिताग्रन्थानां परिचयः-

संहिताग्रन्थेषु बृहत्संहिता, बार्हस्पत्यसंहिता, गर्गसंहिता, गुरुसंहिता, बृहस्पतिसंहिता,

नारदसंहिता, महासंहिता, नारदीयसंहिता, वाराहसंहिता, भृगुसंहिता, रावणसंहिता, वृद्धवसिष्ठसंहिता, वृद्धगर्गसंहिता, लोमशसंहिता, गौतमसंहिता- आदिग्रन्थेषु तत्र नारदसंहितैवं बृहत्संहिता प्रचलितास्ति। रावणसंहितायाः केवलमेकमात्रो हस्तलेखो विद्यमानोऽस्ति तथा च भृगुसंहिता पुस्तकमपूर्णरूपेण यत्र तत्र उपलब्धमस्ति। नारदसंहिता तथा च नारदीयसंहिता द्वयोर्नारदमुनिः प्रणेता। कालभेदेन, लेखनादिभेदेन वा कतिपयश्लोका नाममात्रेण विभिन्ना दृश्यन्ते। नारदपुराणान्तर्गतापि नारदसंहिता दरीदृश्यते। तस्य श्लोकाः प्रायः समानार्थकास्तथा च तस्य नारदीयज्योतिषमिति नाम्ना प्रकाशिनमभवत्।[२९]

ज्योतिश्चक्रे तु लोकस्य सर्वस्योक्तं शुभाशुभम्।
ज्योतिर्ज्ञानं तु यो वेद स याति परमाङ्गतिम् ।।[३०]
न सांवत्सरपाठी च नरकेषूपपद्यते।
ब्रह्मलोकप्रतिष्ठां च लभते दैवचिन्तकः।।[३१]

दिक्देशकालव्यञ्जकत्वेन यज्ञ-तप-दान-व्रतोपवास-पर्वादिसकलकर्मणामादिबीज-कारणेनान्यशास्त्रापेक्षया ज्योतिषशास्त्रस्याध्ययनमावश्यकम्। वेद-वेदाङ्ग-उपनिषद्-दर्शन-पुराणेतिहासादीनामेकमात्रं सिद्धान्तः - सर्वे मनुष्या यज्ञ-तप-दान-व्रतादिसाधनाद्वारा ईश्वरप्राप्तिध्येयं सिद्धं कुर्वन्वित्यभिलाषा सेव्यते। किन्त्वुचितसमये कर्म कृतं सफलं भवति। अकाले कृतं कर्म निष्फलं भवति। दुर्गतिः प्राप्यते। अत एव कालात्मकज्योतिषशास्त्रस्य प्रयोजनं पदे पदे स्पष्टं सिद्धं भवति। तस्य ज्ञानं विना वैदिकं लौकिकं वा किमपि कार्यं न सिद्ध्यति। निश्चितमुहूर्ते निश्चितकालान्तर्गतः संस्कार एवं समस्तयज्ञक्रिया सम्पन्ना भवितुं आवश्यका। तस्य ज्ञानहेतोर्ज्योतिषशास्त्रीयं पञ्चाङ्गमेकमात्रमाधारः। पञ्चाङ्गद्वारा संस्कारो

---

२९ नारदसंहिता विहंगमदृष्टिः पृ. – ११/१२
३० ना.सं.विहङ्गमद्रष्टि पृ.१०
३१ बृ.सं. अ. २ श्लो.२८

यज्ञानुष्ठानं एवं यात्रादिकार्यसम्बन्धितमुहूर्तानां ज्ञानं शक्यं भवति। ज्योतिषशास्त्रस्य ज्ञानेन स्वर्गादिरुत्तमलोको प्राप्यते। तथा च –

SMT. HANSA MEHTA LIBRARY • The M. S. University of Baroda

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।।४१।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।४२।।[३२]

## १.१.१७ उपसंहारः-

अस्मिन्प्रकरणे ज्योतिषशास्त्रस्य व्याख्या, व्याकरणशास्त्रीयं स्पष्टीकरणम्, ज्योतिषस्य विविधत्वम्, ज्योतिषस्य महत्त्वम्, ज्योतिषस्य प्राचीत्वम्, सिद्धान्तसंहिताहोराविषयाणां परिचयः, संहितानां परिचयः, ज्योतिषस्य सामान्येतिहासः- एते विषयाः प्रतिपादिताः सन्ति।

---

३२ सिद्धान्तकौमुदी – पाणिनीशिक्षा ४१,४२